# द्रव्याणां कर्मसामर्थ्यम्

डा.अनूषा गुरुराज्
वरिष्ठशोधाध्येत्री
संस्कृतसंवर्धनप्रतिष्ठानम्
vaidyaanushaa@gmail.com

**सारांशः**

आहारद्रव्यं सर्वप्राणिनां पोषकेन्धनम् । जीवनस्य त्रिषु उपस्तम्भेषु आद्यः स्तम्भः आहारः वर्तते । देहधारणं पोषणं च तेन विना असाध्यम् । तद्वत् औषधद्रव्याणि अपि दोषादिकानां शमनं, रोगनिवारणं, स्वास्थ्यस्थापनं च कुर्वन्ति । देहपोषकाः आहाराः तथा रोगनिवारकाणि औषधानि च शरीरे कयाचित् शक्त्या कार्यं कुर्वन्ति । तेषु विद्यमानाः केचन अंशाः शरीरस्थानां दोष-धातु-मलादिकानां पोषणं कर्षणं वा कुर्वन्ति ।

## प्रस्तावना

**द्रव्यम्** – द्रु गतौ , गतिनिवृत्तिः । यस्मिन् गुणाः कर्म च समवायसम्बन्धेन तिष्ठति तद् द्रव्यम् इति कथ्यते । पुनश्च यस्य उपयोगेन मानवः रोगनिवृत्तिं तथा स्वास्थ्यप्राप्तिं च आप्नोति, तद् द्रव्यम् इति उच्यते ।

उपयोगदृष्ट्या द्रव्यं द्विविधम्

१.आहरद्रव्यम्　　२.औषधद्रव्यम्

आहारः – अहरहर्गच्छति गलाद् अधः इति आहारः । आहारादेव जन्तवः सम्भवन्ति, विवर्धन्ते जीवन्ति च । अत्र उपनिषद्वाक्यं स्मर्यते ।

**अन्नाद् भूतानि जायन्ते जातान्यन्नेन वर्धन्ते ।**
**अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते ॥** ***तैत्तिरीयोपनिषद्***

एतादृशः समवायी सम्बन्धः आहारेण सह अस्ति शरीरस्य । ***तत्र शरीरं नाम चेतनाधिष्ठानभूतं पञ्चमहाभूत-विकार-समुदायात्मकं समयोगवाहि । चरकसंहिता,शा,६/४*** शरीरम् इत्युक्ते पञ्चमहाभूतैः निर्मितं, दोषधातुमलसमुदयः, इन्द्रियाणां, मनसः, आत्मनश्च अधिष्ठानम् ।

यथा पूर्वम् उक्तम्, द्रव्यं तु रस-गुण-वीर्य-विपाक-कर्मणां आश्रयः अपि । यस्य उपयोगेन वैद्यः रोगनिवारणां करोति, येन शरीरं पुष्यति, येन च मानवाः कार्यकरणे समर्थाः भवन्ति तद् सर्वं द्रव्यम् इति कथ्यते । यस्मिन् गुणाः कर्म च समवायी भावेन सन्ति सः आश्रयभूतः अंशः एव द्रव्यम् इति कथ्यते ।

**वैद्यो व्याधिं हरेद्येन तद्द्रव्यं प्रोक्तमौषधम् । अत्रिसंहिता**
**यत्राश्रिताः कर्मगुणाः कारणं समवायि यत् । तद् द्रव्यम् । *चरक.सू.१/५१***
**द्रवन्ति रोगास्तद्योगान्नरः स्वास्थ्यञ्च विन्दति ।**
**द्रव्यलक्षणं तु क्रियागुणवत् समवायिकारणम् ॥ *पी.वी.शर्मा, द्र.गु.वि***
**रसादीनां पञ्चानां पदार्थानां यदाश्रयभूतं तद् द्रव्यम् । *रसवैशेषिकसूत्रम् १/१६६***

**सर्वं द्रव्यं पाञ्चभौतिकम् । (महाभूतानि खं वायुरग्निरापः क्षितिस्तथा । शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्गुणाः ॥** *(च.सं.शा.- १/२७)* अस्मिन् जगति सर्वाणि द्रव्याणि पञ्चमहाभूतैः निर्मितानि सन्ति । जगति विद्यमानानां सर्वेषां द्रव्याणां कारणद्रव्याणि पञ्चमहाभूतानि एव । तेषां तरतमसंयोगात् एव कार्यद्रव्याणां उत्पत्तिः संभवति ।

**तत्र पृथिव्यापस्तेजोवाय्वाकाशानां समुदायाद्द्रव्याभिनिर्वृत्तिः उत्कर्षस्त्वभिव्यञ्जको भवति - इदं पार्थिवमिदमाप्यमिदं तैजसमिदं वायव्यमिदमाकाशीयमिति ।** *(सु.सं.सू.-४१/३)*

शरीरं पाञ्चभौतिकं तथा द्रव्याणि अपि पञ्चमहाभूतैः निर्मितानि सन्ति । यतोऽहि सर्वाणि पाञ्चभौतिकानि, भूतानां तरतमभावात् तेषु गुणः भिद्यते । यत्र पृथिवी भूतम् अधिकं, तद् द्रव्यं पार्थिवम् इति कथ्यते । तद् द्रवयं पृथ्वीगुणभूयिष्ठं च भवति, जलभूयिष्ठं द्रव्यं आप्यम् इति कथ्यते, तच्च जलीयगुणयुक्तं भवति, अग्निभूतभूयिष्ठं द्रव्यम् आग्नेयं, वायुभूतभूयिष्ठं वायवीयं तथा आकाशभूतभूयिष्ठं आकाशीयं द्रव्यम् इति कथ्यन्ते, ते समानभूतगुणयुक्तानि च भवन्ति । एवमेव शरीरे स्थिताः दोषाः, धातवः, मलाश्च पञ्चमहाभूतानां संयोगः एव । यथा वाय्वाकाशभूतयोः संयोगात् वातः, आग्निभूतात् पित्तं, जलपृथ्वीभ्यां कफदोषः च उत्पद्यन्ते । सप्त धातवः अपि पञ्चभूतात्मकाः यथा रसः जलभूयिष्ठः, रक्तं जलेन सह अग्निभूतात्मकं, मांसं, मज्जा, मेदश्च जलपृथ्वीभूतात्मकाः, अस्थि आकाशभूयिष्ठं, शुक्रम् अप्-भूयिष्ठम् इति ।

## द्रव्याणां कार्यविधिः

द्रव्ये प्राधान्येन पञ्च घटकाः सन्ति – रसः, गुणः, विपाकः, वीर्यं, प्रभावः च । द्रव्याणां कार्यं विविधायामैः सम्भवति । कदाचित् तेषु विद्यमानस्य महाभूतस्य गुणवत् भवति, अथवा द्रव्यस्य रसवत्, गुणवत्, वीर्यवत्, अथवा प्रभाववत् वा सम्भवति ।

**न तु केवलं गुणप्रभावादेव द्रव्याणि कार्मुकाणि भवन्ति, द्रव्याणि हि द्रव्यप्रभावाद्गुणप्रभावाद् द्रव्यगुणप्रभावाच्च तस्मिंस्तस्मिन् काले तत्तदधिकरणमासाद्य तां तां च युक्तिमर्थं च तं तमभिप्रेत्य यत् कुर्वन्ति तत् कर्म, येन कुर्वन्ति तद्वीर्यं, यत्र कुर्वन्ति तदधिकरणं, यदा कुर्वन्ति स कालः यथा कुर्वन्ति सः उपायः, यत् साधयन्ति तत् फलम् ॥** *(च.सं.सू.२६/१३)*

## रसपञ्चकः

रसः – **रसनार्थो रसः ।** च.सू.१/६४, **रसनेन्द्रियग्राह्यो योऽर्थः स रसः ।** द्र.गु.सं.१/१, **रस्यते आस्वाद्यते रसनया रसनेन्द्रियेण वा इति रसः । द्रव्ये विद्यमानः रसः, रसनेन्द्रियग्राह्यः विषयः अस्ति । रसाः षड्विधाः ।**

**सस्तावत् षट् मधुराम्ललवणकटुतिक्तकषायाः ।** *च.वि.१/४*

मधुरः , अम्लः, लवणः, कटुः, तिक्तः,कषायः च । मधुरः रसः बलवत्तमः भवति, मधुरस्यापेक्षया अम्लं, तस्यापेक्षया लवणः, तथा तिक्तं, कटुः, कषायः च क्रमेण न्यूनबलयुक्ताः भवन्ति ।

**रसाः स्वाद्वम्ललवणतिक्तोषणकषायकाः ।**
**षड् द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः ॥** *(अ.हृ.सू.-१/१४-१५)*

एते रसाः वातादीनां दोषाणां प्रकोपनं प्रशमनं वा कुर्वन्ति । यथा मधुराम्ललवणाः वातं शमयन्ति, किन्तु कफं कोपयन्ति । कटुतिक्तकषायाः कफं शमयन्ति, किन्तु वातम् उदीरयन्ति । मधुरतिक्तकषायाः पित्तदोषं शमयन्ति, कट्वम्ललवणाः पित्तम् उदीरयन्ति ।

मधुररसः स्निग्धगुणयुक्तः भवति, अतः शरीरे स्नेहांशं वर्धयति, सप्तधातूनां (रस-रक्त-मांस-मेदः-अस्थि-मज्जा-शुक्राणाम्), ओजसः च पोषणं करोति, आयुः वर्धयति, पञ्चज्ञानेन्द्रियाणि मनः च प्रसादयति, तेषां कार्यक्षमतां वर्धयति, शरीरकबलं वर्धयति, सौन्दर्यं पोषयति, पित्तदोषं विषजन्यविकारं वातदोषं च शमयति, तृष्णां दाहं च प्रशमयति, त्वचः स्निग्धतां जनयति, केशाय हितं भवति, स्वरं शुद्धं करोति, शरीरं प्रीणयति, जीवनशक्तिं वर्धयति, तृप्तिं जनयति, शरीरं बृंहयति, स्थिरत्वं जनयति, क्षीणधातूनां

क्षतशरीरस्य च शीघ्रं सन्धानं करोति, घ्राण-मुख-कण्ठ-ओष्ठ-जिह्वानां विशोधनं करोति, दाहजन्यकष्टं मूर्च्छां च निवारयति । अधिकमात्रया उपयोगेन मधुरः रसः शरीरे क्लेदं, स्निग्धतां च वर्धयित्वा स्रोतसाम् अवरोधं जनयति ।

अम्लः रसः दन्तान् हर्षयति, मुखात् लालास्रावं कारयति, स्वेदम् उत्पादयति, मुखस्य जागृतिम् आपादयति, कण्ठे विदाहं च जनयति भोजने रुचिम् उत्पादयति च । शरीरं बृंहयति, बलं कार्योत्साहं च वर्धयति, मनः उद्बोधयति, इन्द्रियाणि शरीरावयवान् च दृढीकरोति, कुपितं वातदोषम् अनुलोमयति, हृदयस्य तर्पणकारकं भवति । अतिमात्रया सेवनया पित्तदोषम् उदीर्य पित्तविकारान् च जनयति ।

लवणः रसः भोजने रुचिम् आपादयति, लालास्रावं कारयति, मुखे मृदुत्वम् उत्पादयति, मुखदाहं च करोति, जठराग्निम् उद्दीपयति, भुक्तं क्लेदयति, पचति च । वातदोषं शमयति, मलबन्धं, सङ्घातं च निवारयति, कफदोषं विष्यन्दयति, शरीरस्रोतांसि विशोधयति, तथा शरीरावयवान् मृदूकरोति । किन्तु अत्युपयोगात् रक्तं वर्धयति, पिपासाधिक्यं जनयति, मूर्च्छां जनयति, सन्तापम् उपजनयति, त्वचं विदारयति, मांसानि कुष्णाति, शोफान् स्फोटयति, दन्तान् च्यावयति, पौरुषत्वं नाशयति, इन्द्रियाणां कार्यक्षमत्वं नाशयति, असमयं वलिं(चर्मवलिं) पलितं खालित्यम् (केशानां पातः) च उत्पादयति । अपि च रक्तपित्तम् अम्लपित्तं वीसर्पं वातरक्तं विचर्चिका, इन्द्रलुप्तादीन् विकारान् जनयति ।

कटुकः रसः मुखं शोधयति, जठराग्निम् उद्दीपयति, भोजने रुचिम् उत्पादयति, भुक्तं शोषयति, घ्राणम् आस्रावयति, चक्षुषः अश्रुस्रावम् उत्पादयति, इन्द्रियाणां स्वकार्यं कर्तुम् उत्साहं जनयति । अलसकरोगं, शोथं, स्थौल्यम्, अभिष्यन्दं, स्नेहं, स्वेदं, क्लेदं, दुष्टमलान् च नाशयति । कण्डूरोगं व्रणान् च नाशयति, कृमीन् हन्ति, दुष्टं मांसं विलिखति, स्रोतांसि विवृणोति, कफदोषं शमयति च । किन्तु कटुरसस्य अत्युपयोगात् पुरुषत्वं नाशयति, संज्ञानाशं करोति, शरीरावयवानां ग्लानिं अवसादं च जनयति । शरीरस्थान् धातून् शिथिलयति, धातु-मलान् कर्षयति, मूर्च्छां जनयति, भ्रमम् उत्पादयति, कण्ठं दहति, शरीरे तापम् उत्पादयति, बलस्य क्षयं करोति, पिपासाधिक्यं जनयति अङ्गानां कम्पं तोदं भेदं च करोति ।

तिक्तः रसः स्वयम् अरोचिष्णुः भवति, तथापि अरोचकं नाशयति, मुखं शुद्धं करोति, जठराग्निम् उद्दीपयति, भुक्तं पाचयति, विषजन्यविकारं कृमीन् मूर्च्छां दाहं कण्डूरोगं कुष्ठं ज्वरं पिपासाधिक्यं च प्रशमयति, त्वचं मांसं च स्थिरीकरोति, शरीरक्लेदं मेदः वसां मज्जां लसीकां पूयं स्वेदं मूत्रं पुरीषं पित्तं कफं च शोषयति । सः लघुः भवति, मेधायै हितः, शीतवीर्यः, रूक्षगुणः, स्तन्यदोषस्य संशोधनः, कण्ठविशोधनः च भवति । अधिकम् उपयुज्यते चेत् बलं क्षपयति, शरीरं कर्शयति, ग्लानिम् उत्पादयति, संज्ञानाशं करोति, भ्रमं जनयति, मुखशुष्कतां जनयति, अन्यान् वातविकारान् जनयति च ।

कषायः रसः जिह्वां स्तम्भयति, कण्ठम् अवरोधयति, हृदयं कर्षयति पीडयति च । सः मलमूत्रयोः सङ्ग्राहकः भवति, भग्नास्थ्यादीनां सन्धानं करोति, इन्द्रियाणि पीडयति, व्रणानां रोपणं करोति, कफदोषं रक्तपित्तं च प्रशमयति, शरीरस्थान् स्वेद-पूयादीन् क्लेदान् शोषयति । अधिकः उपयुक्तः कषायः रसः मुखं शोषयति, हृदये पीडां जनयति, उदरे आध्मानं करोति, वाक्-शक्तिं नाशयति, शरीरे श्यावववर्णतां जनयति, पौरुषत्वं नाशयति, कृशत्वं जनयति, उत्साहं नाशयति, पिपासाधिक्यं जनयति, शरीरावयवान् स्तम्भयति । पक्षाघातं, हनुग्रहम्, अपतानकम्, अर्दितम् इत्यादीन् वातविकारान् जनयति ।

**तत्राद्याः मारुतं घ्नन्ति त्रयस्तिक्तादयः कफम् ।**
**कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ।।** *(अ.हृ.सू.-१/१५-१६)*

एषः तु सामान्यः नियमः , अत्र अपवादाः अपि सन्ति यथा मधु मधुररसात्मकं सदपि कफं न वर्धयति अपितु नाशयति । दाडिमम्, आमलकीफलं च अम्लरसयुक्ते सती अपि पित्तप्रकोपणे न, प्रायः सर्वे लवणाः नेत्राभ्याम् अहिताः , सैन्धवं विहाय । कटुप्रधानेषु द्रव्येषु शुण्ठीं,पिप्पलीं,लशुनं च विहाय तथा तिक्तद्रव्येषु गुडूचीं, पाटलां च विहाय सर्वाणि कटुतिक्तरसात्मकानि द्रव्याणि वातं प्रकोपयन्ति, पुंस्त्वं नाशयन्ति च, एवमेव कषायरसात्मकेषु द्रव्येषु हरीतकीं विहाय अन्यानि कषायरसभूयिष्ठानि द्रव्याणि शरीरे शैत्यं स्तम्भनं विशेषतया मलबद्धतां च जनयन्ति । किन्तु हरीतकी मलभेदकेषु द्रव्येषु श्रेष्ठा अस्ति ।

**गुणः** – गुण आमन्त्रणे, गुण्यते आमन्त्र्यते लोक अनेन इति गुणः । लोकः अस्य कारणात् एव आकृष्टः भवति । एवमेव द्रव्ये विद्यमानात् गुणात् एव द्रव्यं कर्मसमर्थं भवति ।

**समवायी तु निश्चेष्टः कारणं गुणः ।** *च.सं.सू.१/५१*

द्रव्यं गुणकर्मणः आश्रयः अस्ति, गुणः स्वयं निर्गुणः, द्रव्याश्रितः, कर्म अनाश्रितं च अस्ति । द्रव्ये विद्यमानः एषः अंशः द्रव्यस्य कर्मणः कारणं भवति । गुणाः तु बहवः सन्ति यथा गुर्वादयः, परादयः, आत्मनः गुणाः इत्यादयः । विशेषतया विंशतिः

गुर्वादि गुणाः अत्र लक्ष्यन्ते - यथा, गुरुः x लघुः, मन्दः x तीक्ष्णः, हिमः x उष्णः, स्निग्धःx रूक्षः, श्लक्ष्णःx खरः, सान्द्रः x द्रवः, मृदुः x कठिनः, स्थिरः x चलः, सूक्ष्मः x स्थूलः, विशदः x पिच्छिलः।

**गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिराः।**
**गुणाः ससूक्ष्मविशदा विंशतिः सविपर्ययाः॥** *(अ.हृ.सू.-१/१८)*

शरीरे विद्यमानाः गुरवः अंशाः गुरुभिः आहारविकारैः आप्याय्यन्ते, किन्तु लघवः अंशाः ह्रसन्ते, एवमेव लघुभिः आहारविकारैः लघ्वंशाः आप्याय्यन्ते, गुरवः ह्रसन्ते च। एवमेव सर्वधातुगुणानां सामान्ययोगाद् वृद्धिः, विपर्यासाद्ध्रासः भवति। (च.शा.६/१०) द्रव्यं गुणानुगुणं शरीरे कार्यं करोति। द्रव्यं समानगुणयुक्तस्य दोषस्य, धातोः वा पोषणम्/ उद्दीपनं तथा विरुद्धगुणस्य दोषस्य, धातोः वा शमनं करोति। यथा स्निग्धगुणयुक्तं क्षीरं शरीरे मांसस्य, मेदसः, शुक्रधातोः, कफस्य च पोषणं करोति। लघुगुणभूयिष्टः मुद्गयूषः शरीरे लघुतां जनयति। सामान्यतया मधुर-लवण-कषायरसद्रव्याणि गुरवः, तथा अम्ल-कटु-तिक्तद्रव्याणि लघवः भवन्ति। मधुर-अम्ल-लवणद्रव्याणि स्निग्धानि, कटु-तिक्त-कषायद्रव्याणि रूक्षगुणान्वितानि, अम्ल-लवण-कटुद्रव्याणि उष्णगुणोपेतानि तथा मधुर-तिक्त-कषायद्रव्याणि शीतगुणान्वितानि च भवन्ति। सामान्यतः गुरुः, स्निग्धः, पिच्छिलः, मन्दः, शीतः, स्थिरः, द्रवः, मुदुः एते गुणाः शरीरे कफं वर्धयन्ति। उष्णः, स्निग्धः, तीक्ष्णः, लघुः, विशदः गुणाः पित्तं वर्धयन्ति/पोषयन्ति। तथा लघुः, कठिणः, तिक्ष्णः, चलः, सूक्ष्मः, शीतः एते गुणाः वातं पोषयन्ति/जनयन्ति।

**लघु पथ्यं परं प्रोक्तं कफघ्नं शीघ्रपाकि च।**
**गुरु वातहरं पुष्टिश्लेष्मकृच्चिरपाकि च॥**
**स्निग्धं वातहरं श्लेष्मकारि वृष्यं बलावहम्।**
**रूक्षं समीरणकरं परं कफहरं मतम्॥** ..........*(भा.प्र.पू.-६/१/२०२-२११)*

**विपाकः** – द्रव्यस्य जरणानन्तरे यः रसः उत्पद्यते सः विपाकः कथ्यते।

**जाठरेणाग्निना योगाद्यदुदेति रसान्तरम्।**
**रसानां परिणामान्ते स विपाक इति स्मृतः॥** *अ.हृ.सू.९/२०*

विपाकः त्रिविधः। मधुरलवणतिक्तकषायाणां प्रायशः मधुरविपाकः , अम्लस्य अम्लविपाकः, कटोः कटुविपाकः भवति। शरीरे तेषां परिणामः अपि रसवत् भवति। यथा मधुरः विपाकः शरीरं पोषयति, तर्पयति, धातुपोषणं, बलवर्धनं च करोति, इन्द्रियाणां तृप्तिं जनयति, मनो ह्लादयति इत्यादयः।

**कटुतिक्तकषायाणां विपाकः प्रायशः कटुः।**
**अम्लोऽम्लं पच्यते स्वादुर्मधुरं लवणस्तथा।** **च.सं.सू.२६/५८**

किन्तु कदाचित् विपरीतम् अपि भवितुमर्हति। यथा पिप्पली कटुरसयुक्ता चेदपि मधुरविपाका भवति। अतः अस्य प्रभावः शरीरे मधुररसवत् भवति।

**वीर्यम्** – (वीर् विक्रान्तौ) द्रव्यं येन (कार्यं) कुरुते तद्वीर्यम्। अर्थात् वीर्यं द्रव्यस्य कर्मणि करणभूतः गुणः। वीर्यं विना कर्म न सम्भवति। सर्वं कर्म वीर्यकृतम् इति आचार्यः चरकसंहितायाम् अभिप्रेति।

आचार्यः वाग्भटः, आचार्यः सुश्रुतः च एवं मन्येते। यदा गुर्वादि गुणः अधिकशक्तियुक्तः भवति सः एव वीर्यम् इति कथ्यते।

**गुर्वाद्या वीर्यमुच्यन्ते शक्तिमन्तोऽन्यथा गुणाः।**
**परसामर्थ्यहीनत्वात् गुणा एवेतरे गुणाः॥** *अ.सं.१७/४४*

द्रव्यस्य रसानुगुणं वीर्यम् एवं भिद्यते - मधुर-तिक्त-कषायरसद्रव्याणां वीर्यं शीतं , कटु-अम्ल-लवणरसयुक्तानां द्रव्याणाम् उष्णवीर्यम् इति सामान्यनियमः। किन्तु अत्रापि अपवादाः सन्ति। पिप्पली कटु चेदपि अनुष्णवीर्या भवति, आमलकीषु तु पञ्चरसाः भवन्ति सा शीतवीर्या। सामान्यतया उष्णवीर्यं द्रव्यं शरीरे पित्तं प्रकोपयति, शीतवीर्यं द्रव्यं कफं, वातं च वर्धयति।

**प्रभावः** – प्रभावः द्रव्ये विद्यमानः विशेषः गुणः । द्वयोः द्रव्ययोः रस-गुण-वीर्य-विपाकादयः समानाः सन्तोपि एकस्य द्रव्यस्य विशिष्टं कर्म यद् भवति तद् प्रभावजम् इति उच्यते । चित्रकः, दन्ती च कटुरसात्मकौ, कटुविपाकौ, उष्णवीर्यौ च किन्तु दन्ती विरेचनकारी भवति, चित्रकः न । एतत् विशिष्टं कर्म प्रभावकारणात् सम्भवति । एवमेव अगस्त्यः नेत्र्यः, अर्जुनः हृद्यः इत्यादयः ।

द्रव्ये रस-वीर्य-विपाक-प्रभावाणां बलसाम्ये सति – विपाकः तस्मिन् विद्यमानं रसम् अपोह्य स्वकार्यं करोति (पिप्पल्याः मधुरविपाकित्वात् कटुरसयुक्ता चेदपि सा पित्तं न वर्धयति यतः तस्याः कार्यं विपाकानुगुणं भवति ।) तथैव वीर्यं विपाकबलम् अपोह्य स्वकार्यं करोति । प्रभावस्तु त्रयाणाम् अपि बलम् अपोह्य स्वकार्यं करोति इति । अतः कानिचन उदाहरणानि अत्र दीयन्ते । कपित्थं अम्लरसात्मकं तथैव आमलकी अपि अम्लरसात्मिका किन्तु कपित्थं मलसंग्रहणं करोति आमलकी मलभेदनम् । पिप्पली कटुरसात्मिका, नागरम् अपि कटुरसात्मकं, किन्तु पिप्पली पुंस्त्वकरं, नागरं पुंस्त्वनाशनम् । कषायरसयुक्तानि द्रव्याणि मलस्तम्भनं कुर्वन्ति किन्तु हरीतकी मलभेदनं करोति । एवं रस अथवा गुणसाम्ये अपि द्रव्याणां कर्मवैशेष्यं तेषां प्रभावकारणं स्यात् इति आचार्याणां मतम् ।

**किंचिदम्लं हि संग्राहि किंचिदम्लं भिनत्ति च ।**
**यथा कपित्थं संग्राहि भेदि चामलकं तथा ।।**
**पिप्पली नागरं वृष्यं कटु चावृष्यमुच्यते ।**
**कषायः स्तम्भनः शीतः सोऽभयायामतोऽन्यथा ।।**
**तस्माद्रसोपदेशेन न सर्वं द्रव्यमादिशेत् ।**
**दृष्टं तुल्यरसेऽप्येवं द्रव्ये द्रव्ये गुणान्तरम् ।।** *(च.सं.सू.-२६/५०-५२)*

रसाद् विपाकः तस्मात् वीर्यं तस्माच्च प्रभावः बलवान् भवति । प्रायशः आहारद्रव्याणि रसानुगुणं शरीरे कार्यं कुर्वन्ति । किन्तु औषधद्रव्याणां कर्मसामर्थ्यं भिन्नम् । अतः आचार्यः वाग्भटः निरूपयति - "किञ्चिद्रसेन कुरुते कर्म पाकेन चापरम् । गुणान्तरेण वीर्येण प्रभावेणैव किञ्चन ।। (अ.हृ.)" अतः वैद्यैः औषधनिर्धारणं द्रव्याणां गुणादिकं समीक्ष्य क्रियते । तथा आतुरस्य प्रकृतिं, शारीरकबलं, मानसिकस्थैर्यं, देशं, वयः, आहारशैलीं, जीर्णशक्तिं, व्यायामशक्तिं, संहननं तथा रोगस्य, कालस्य च अवस्थां, दोषं, दूष्यादिकं च परीक्ष्य निर्दिष्टद्रव्यस्य प्रयोगः क्रियते । यदि सर्वाणि द्रव्याणि समानानि तर्हि एकेनैव वा द्रव्येण सर्वान् विकारान् परिहर्तुं शक्नुयाम । किन्तु तन्न, द्रव्याणां सामर्थ्यं अनूह्यम् । अतः चरकसंहितायां निरुपितं ....प्रभावो अचिन्त्यः (च.सं.सू.-२६/४७) इति ।

## सन्दर्भग्रन्थाः


चरकसंहिता – आयुर्वेददीपिकाव्याखा - चौखम्भा ओरिएन्टलिया, वारणासि
सश्रुतसंहिता – आयुर्वेदतत्वसन्दीपिकाव्याख्या -चौखम्भा संस्कृतसंस्थान
अष्टाङ्गसङ्ग्रहः – चौकाम्भा ओरिएन्टलिया, वारणासि
अष्टाङ्गहृदयम् – डा.ब्रम्हानन्द त्रिपाठी - चौखम्भा संस्कृतसंस्थान
आयुर्वेदीय मौलिकसिद्धान्ताः – संस्कृतसंवर्धनप्रतिष्ठानम्
द्रव्यगुण विज्ञान् – आचार्य प्रियव्रत शर्मा – चौखम्भा भारती अकादमी